कोविदाः। शिरः समं तथा वृत्तमावर्त्तद्वयभूषितम्। केशाश्च मृदवश्चैव बहवश्चैव पूजिताः। ऋजुता कर्णयोश्चैव तीक्ष्णता तनुता तथा। अदीर्घरोमता चैव प्रशस्ता विप्रकीर्त्तिता। सुवृत्ताकुञ्चिताश्चैव धन्यां ग्रीवां विदुर्बुधाः। केशरश्च जटाहीनो मृदुश्चैव प्रशस्यते। सुबद्धश्च दृढश्चैव स्कन्धो वाहस्य पूजितः। वक्षः प्रशस्तं विपुलं निर्गतं विशदं च तत्। ऋजुवृत्तसमौ बाहू गूढं जानु प्रशस्यते। अवक्रा मांसहीना च वाजिजङ्घा प्रशस्यते। शुभं स्मृतं सुवृत्तं च समं चैव नतोन्नतम्। कूर्चमेवंविधं विद्याद्ग्रन्थिव्रणविवर्जितम्। दृढमण्डकिकायुक्तो वर्त्तुलः स्निग्धसन्धिकः। खुरः खरखुराकारः प्रशस्तः समुदाहृतः। पार्श्वे चैव समे वृत्ते ऊर्द्ध्वमांसोपशोभिते। अविलम्बि सुवृत्तं च उदरं चातिपूजितम्। नातिदीर्घं समं पृष्ठं किञ्चिच्च विनतं शुभम्। सुवृत्ता चैव पीना च कटिर्धन्या प्रकीर्त्तिता। मृदुस्निग्धायतैर्युक्तं बालैः पुच्छं प्रशस्यते। वृषणौ च समौ वृत्तौ ईषल्लम्बावलोमशौ। कृष्णवर्णविहीनं तु ह्रस्वं मेहनमिष्यते। अनुपूर्वं परं चैव शोभनं चोरुकद्वयम्। पूर्वजङ्घे च जङ्घादि खुरान्तं चापि पश्चिमम्। शालिहोत्रादिभिः प्रोक्तं मुनिभिः पूर्ववेदिभिः"।

आवर्त्तलक्षणम् "विंशतिस्तु शुभाः प्रोक्ताः षट्सप्तत्यशुभाः स्मृताः। उत्तरोष्ठप्रपाणस्थास्तत्रावर्त्ताः शुभावहाः। सृक्कण्योश्च यथा प्रोक्ताः सर्वकामफलप्रदाः। त्रयश्चैवाथ चत्वारो वाजिनो यस्य रोमजाः। द्वौ वा ललाटजौ यस्य स तु धन्यतमः स्मृतः। आनुपूर्व्या स्थिताश्चोर्द्ध्वं ललाटे रोमजास्त्रयः। त्रिःश्रेणी नाम सा ख्याता भर्त्तुः सर्वार्थसाधिनी। शिरःकेशान्तयोर्मध्ये श्रीनामाभिधीयते। तत्रावर्त्तः स्थितोऽश्वस्य भर्त्तुर्ज्जयविवर्द्धनः। घण्टाबन्धसमीपस्थो निगालः कीर्त्तितो बुधैः। तस्मिन्देवमणिर्नाम रोमजः शुभकृत् स्मृतः। कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा। आवर्त्ताः पूजिता नित्यं विशेषेण तु मस्तके। आवर्त्ता यस्य चत्वारो वाजिनो वक्षसि स्थिताः। एकः कण्ठे भवेत् स्पष्टं स धन्यः सर्वकामदः। रन्ध्रे चैव सदा भर्त्तुः शंसितार्थप्रदो मतः। उपरन्ध्रोद्भवश्चैव रोमजश्चातिपूजितः। शङ्खचक्रगदापद्मशुक्तिवज्रोपमाश्च ये। विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः। अत ऊर्द्ध्वं प्रवक्ष्यामि रोमजानशुभाय यान्। भर्त्तुः क्लेशवहान् सर्वान्धनप्राणापहारकान्। नासिकापुटयोर्मध्ये प्रदेशः प्रोथ उच्यते। तत्र भर्त्तुर्विनाशाय रोमजोऽश्वस्य कीर्त्तितः। ऊर्द्ध्वस्थो नासिकाच्छिद्रात् स्वामिनः क्लेशदायकः। गण्डजश्चैव भर्त्तारं हन्यावर्त्तो दुरासदः। अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः। तत्रावर्त्तो भवेद्दीनः स्वामिनः कुलनाशनः। अपाङ्गाद्द्व्यङ्गुले चैव प्रदेशः शङ्ख उच्यते। तत्र भर्त्तुर्विनाशाय भवेद्वाहस्य रोमजः। भ्रुवो देशे समुद्भूत आवर्त्तो नैव पूजितः। सुहृद्वियोगकृत्तस्याद्भर्त्तुरर्थविषादकः। सव्यां ग्रीवां शिरां विद्यात्तत्रावर्त्तस्तु कुत्सितः। कक्षयोश्चापि संग्रामे स्वामिनं चाशु घातयेत्। चिबुकस्य समीपस्थो वामदक्षिणभागतः। प्रदेशस्तु हनुर्नाम तत्रावर्त्तो हि दारुणः। अधरोष्ठस्य चाधस्तु चिबुको हि प्रसिद्धकः। तस्मिन् पापो भवेद्भर्त्तुः कर्णयोश्चापि रोमजः। कण्ठस्याथ निगालस्य मध्ये वालक उच्यते। तत्रावर्त्तः स्थितः पापः स्कन्धसन्धिगतश्च यः। अधस्ताज्जङ्घयोश्चैव ग्रन्थिः कूर्च इति स्मृतः। तत्रावर्त्तः स्मृतो भर्त्तुः संग्रामे जीवितान्तकृत्। कूर्चादष्टाङ्गुलं चोर्द्ध्वं पार्श्वयोः ककता स्मृता। तत्र भर्त्तुः शराघाते जीवितान्ताय रोमजः। ककुदं वृषभस्येव सुव्यक्तमुपलक्ष्यते। वाजिनो यस्य तत्रस्थ आवर्त्तस्तु विनाशकृत्। ककुदस्य पुरोभागे समीपे वाह उच्यते। भर्त्तुः सुतसमेतस्य तस्मिन् नाशाय रोमजाः। काकसे तु हयस्य स्यादावर्त्तो यस्य दारुणः। रणे हतः समं भर्त्त्रा क्रव्यादैः स विलुप्यते। क्रोडे चैवासने चापि हृदये चैव वाजिनः। आवर्त्ताः स्वामिघाताय भवन्त्येते न संशयः। पार्श्वयो रोमजो यस्य स चाश्वो नयति क्षयम्। सपत्नं चाशु भर्त्तारं नीहाराम्बु यथाम्बुजम्। कूर्चस्याधःप्रदेशस्तु कुष्ठिश्च परिकीर्त्तितः। अधन्यस्तत्र वाहस्य जघन्यो जानुजश्च यः। नाभिजो मुष्कजश्चैव त्रिकजश्च विशेषतः। पुच्छमूलस्थितश्चापि नैव धन्यः प्रकीर्त्तितः। कुक्षौ व्याधिः, क्षयायैव रोमजाः कुक्षिसंभवाः। पायुत्रिबलिमध्यस्था नैव धन्या प्रकीर्त्तिताः। स्फिचिजः खुरजश्चैव यस्यावर्त्तो हि वाजिनः। लङ्कावर्त्तः स विख्यातो भर्त्तुः सर्वार्थनाशकः। शतपादीति विख्यातस्तथा वै मुकुलोऽपरः। आवर्त्तश्चैव संघातः पादुकश्चार्द्धपादुकः। शुक्तिश्चैवावलीढश्च आवर्त्तः कीर्त्तितोऽष्टधा। वाजिदेहगतः सम्यक् शुभाशुभनिवेदकः। शतपादीसमाकारः शतपादीति कीर्त्तितः। जातीमुकुलसंकाशो मुकुलः समुदाहृतः। आवर्त्तौ मिलितौ वालैः संघातो रोमपुङ्गकः। शुक्तिश्च शुक्तिसंस्थानै रोमभिर्व्यक्तलक्षणैः। एतेषामेव लीढस्तु अवलीढः प्रकीर्त्तितः। पादुकः पादुकाकारस्तथाचैवार्द्धपादुकः। बालै-